**22E**
**100 Marks**

# टिळक महाराष्ट्र विद्यापीठ, पुणे

**संस्कृत पारंगत (एम.ए.) बहिःस्थ**

**परीक्षा: डिसेंबर– २०२३**

**सत्र १ ले**

**विषय: सामान्य व्याकरण (22E311)**

---

**दिनांक:** ०६/१२/२०२३ **गुण :** १०० **वेळ : स.** १०.०० ते १.००

---

**सूचना:** १) उजवीकडील अंक त्या प्रश्नांचे गुण दर्शवितात. २) सर्व प्रश्न सोडवणे अनिवार्य.

**प्र. १. एकं विषयमधिकृत्य निबन्धो लेख्यः।** (१५)

१.उद्यमेन सिध्यन्ति कार्याणि। २. पञ्च महाकाव्यानि। ३. भारतदेशः।

**प्र. २. द्वयोः माध्यमभाषया अनुवादं कुरुत।** (१२)

१. पुरा पाटलिपुत्रे ब्राह्मणौ भ्रातरावास्ताम्। तयोर्यज्ञसोमोऽग्रजः कीर्तिसोमश्चानुजः। ताभ्यां पितुर्विपुलं धनं द्विधा विभक्तम्। कीर्तिसोमो निजं भागं व्यवहारादवर्धयत। यज्ञसोमस्य तु भागो दानेन भोगेन च क्षयमगच्छत्। ततो निर्धनतां गतः स उदारः स्वभार्यामवदत्। ‘प्रिये! धनाढ्योऽहं निर्धनो भूत्वा अधुना बन्धूनां मध्ये कथं वसामि। अतो देशान्तरं गच्छाव’ इति। भर्तृवचनं निशम्य पत्नी सविनयमवदत्। ‘नाथ! पाथेयं विना कुत्र याव।’ परं यदा स स्वाग्रहं नात्यजत्तदा सा पुनरभाषत। ‘यद्यवश्यं गन्तव्यं तर्हि किञ्चिद् धनं कीर्तिसोमं याचस्वेति’ तदा सोनुजं कीर्तिसोमं गत्वा किञ्चिद्धनमयाचत। कीर्तिसोमोऽपि तस्मै धनं दातुमैच्छत्। परं भार्यायावचनात्तस्मै न किञ्चिदयच्छत्। ततो यज्ञसोमो देवं शरणं गत्वा भार्यया सह देशान्तरं प्रातिष्ठत।

२. तद्गुहाया आयातस्य ते हतशत्रोः सर्वं सविस्तरं निर्व्याकुलतया कथयिष्यामि। अथासौतद्वचनमाकर्ण्य सपरिजन एकैकां ज्वलन्तीं वनकाष्ठिकां चञ्च्वग्रेण गृहीत्वा तद्गुहाद्वारं प्राप्य स्थिरजीविकुलायेप्राक्षिपत्। ततः सर्वे ते दिवान्धरक्ताक्षवाक्यानि स्मरन्तो द्वारस्यावृतत्वादनिःसरन्तो गुहामध्ये कुम्भीपाकन्यायमापन्नामृताश्च। एवं शत्रुनिःशेषतां नीत्वा भूयोऽपि मेघवर्णस्तदेवन्यग्रोधपादपदुर्गं जगाम। ततः सिंहासनस्थो भूत्वा सभामध्ये प्रमुदितमनाः स्थिरजीविनमपृच्छत्- ‘तात ! कथं त्वया शत्रुमध्ये गतेनैतावत्पर्यन्तं कालो नीतः? तदत्र कौतुकमस्माकं वर्तते। तत्कथ्यताम्।

३. सुकन्या-अयि वसुमति, अप्यवकरव्यवस्थापनेन महिलासमूहाः लक्षाधिकं धनं प्राप्नुवन्तीति अद्भुता वार्ता पठिता?

वसुमती-किं वदस्यवकरव्यवस्थापनेन धनलाभः? अशक्यम्।

सुकन्या-शृणु तावत्। तामिळनाडुराज्ये वेल्लोर इत्यत्र पर्यावरणस्याभ्यासकोऽस्ति श्रीनिवासन्महोदयः। एतेन महोदयेन स्थानिकमहिलासमूहानां साहाय्येन शून्य-अवकर-अभियानं सञ्चालितमस्ति। शुष्कस्तथार्द्रोऽवकरं पृथक्स्थापयित्वा जनैः सहकार्यं कर्तव्यमित्यपेक्ष्यते।

वसुमती-अवकरस्तु अवकर एव। शुष्केवार्द्रे वा कोभेदः।

सुकन्या- वसुमति, शुष्कोऽवकरः नाम काचकर्गजसदृशाः अविघटनशीलाः पदार्थाः। आर्द्राऽवकरः नाम शाकावशेषादयो विघटनशीलपदार्थाः।

**प्र. ३. द्वयोः माध्यमभाषया सान्वयमनुवादं कुरुत ।** (१२)

अ. गतेशोको न कर्तव्यो भविष्यं नैव चिन्तयेत्।
वर्तमानेन कालेन वर्तयन्ति विचक्षणाः।।

आ. परोपकारः कर्तव्यः प्राणैरपिधनैरपि।
परोपकारजं पुण्यं न स्यात्क्रतुशतैरपि।।

इ. पात्रविशेषेन्यस्तं गुणान्तरं व्रजतिशिल्पमाधातुः।
जलमिव समुद्रशुक्तौ मुक्ताफलतां पयोदस्य।।

**प्र.४. दशवाक्यानि संस्कृतभाषया अनुवदत।** **(१०)**

१. तिला सापाची भीती वाटते.
२. नगराच्या बाहेर बाग आहे.
३. सुनील गानकलेत हुशार आहे.
४. तपस्वी लोक वनात आनंदाने राहतात.
५. दिशा हेच ज्याचे वस्त्र आहेत त्याला इतर वस्त्रांचा काय उपयोग ?
६. आम्ही सगळे भारतीय आहोत.
७. जेव्हा गुरु बोलावतात तेव्हा तो तत्परतेने जातो.
८. त्या नदीच्या काठी दुर्मिळ वनस्पती आहेत.
९. आनंद हेच त्याचे धन आहे.
१०. पुढील वर्षी गणेशोत्सवात मी नृत्य करेन.
११. मागील आठवड्यात तो आला नाही.
१२. नियमांचे पालन करायलाच हवे.

**प्र. ५. नव रूपाणि लिखत।** **(०९)**

१. वस्तु (नपुं.) द्वितीयाबहुवचनम्।
२. अस्मद्(सर्वनाम) चतुर्थीएकवचनम्।
३. जन्(४ आ.प.) लिङ् मध्यमपुरुषएकवचनम्।
४. वि+भूष् (१० प.प.) लङ् प्रथमपुरुषबहुवचनम्।
५. प्रच्छ् (६प.प) क्त्वा अव्ययम्।
६. ज्ञा (९उ.प.) कर्मणिरूपं लट् प्रथमपुरुषएकवचनम्।
७. गम् (१ प्.प.) लिट् प्रथमपुरुषबहुवचनम्।
८. कथ् (१० प.प.) हेत्वर्थकमव्ययम्।
९. भ्रम् (१प.प.) क्तप्रत्ययान्तं स्त्री. प्रथमा बहुवचनम्।
१० जगत् द्वितीया बहुवचनम्।
११. इदम् (नपुं. सर्वनाम) प्रथमाद्विवचनम्।

**प्र.६. चतुर्दश रूपाणां परिचयं लिखत।** **(१४)**

| | | | | |
|---|---|---|---|---|
| १. चत्वारः | २. प्रणम्य | ३. तुभ्यम् | ४. यास्यतः | ५. इहि |
| ६. प्राक्षिपत् | ७. चिन्तयामास | ८. स्मरन्तः | ९. प्रष्टुम् | १०. कुप्यति |
| ११. हन्ति | १२. ब्रुवीरन् | १३. अनयोः | १४. धेन्वा | १५. केसरी |

**प्र.७ . दशवाक्यनि सूचनानुसारं परिवर्तयत।** **(१०)**

१. ........जनैः ग्रन्थः सम्पादितः।(अष्ट इति सङ्ख्यावाचकस्य योग्यं पदं लिखत।)
२. पाठमपठः।(भवत्सर्वनाम्नः कर्तृपदं योजयत।)
३. मर्कटः वृक्षम् .......... (आ+रुह् ल्यप्) उपविशति।
४. देवी मह्यमाशीर्वादं यच्छति।(बहुवचने परिवर्तयत।)
५. आवां गृहपाठं कुर्वः। (लङ्लकारे परिवर्तयत।)
६. साधवः दक्षिणाः अयाचन्त। (एकवचने परिवर्तयत।)
७. ........नमः। (चन्द्रमस् इति पदस्य योग्यं रूपं लिखत।)
८. वयं तदा वर्गे अतिष्ठाम। (लृट् लकारे परिवर्तयत।)
९. अहं देवं ध्यायामि नमामि च।(पूर्वकालवाचकं योजयत।)

१०. सः पुण्यपत्तने वसति स्म।(स्म निष्कासयत।)

११. ........ भीमः बलवत्तरः। (अर्जुन इति पदस्य योग्यं रूपं लिखत।)

१२. गणेशाय मोदकः रोचते।(स्पृह् धातोः रूपं लिखत।)

**प्र.८.अ द्वयोः सन्धीन् वा सन्धिविग्रहं वा कुरुत।** **(०२)**

अ. वाक् +दानम्= आ. वृक्षे+अस्मिन्=---- इ. कोऽप्यजगरः=-----+ ------

**आ चतुर्णां नामनिर्देशपूर्वकं समासविग्रहं कुरुत।** **(०८)**

१. राजपुरुषः २. दर्शितादरः ३. मातृवत्सलः ४. पयोदः ५. प्राचार्यः

**इ. षण्णां वाच्यपरिवर्तनं कुरुत।** **(०६)**

१. अहं शास्त्रस्य अध्ययनं बोधेयम्।

२. दानवैः विषादः अनुभूयताम्।

३. व्याघ्रः गर्जति।

४. जनैः सः अदृश्यत।

५. सिंहः मृगं नखैः विदार्य अभक्षयत्।

६. सः तिष्ठति।

७. अहमत्र प्रतिकारं कृतवान्।

**ई द्वयोः सतिसप्तमीवाक्यरचनां कुरुत निष्कासयत वा।** **(०२)**

१. उदिते तु सहस्रांशौ न खद्योतः न चन्द्रमाः।

२. मयि याते सः त्वां भक्षयेत्।

३. यदा वनवृक्षः पतति तदा लता अपि पतति।

------------